जनङ्गमः, पुं, (जनेभ्यो गच्छतीति । "गमश्च ।" ३ । २ । ४३ । खच् मुमागमश्च ।) चाण्डालः । इत्यमरः । २।१०।१९ ॥ (यथा, माघे ।१५।३५ ।
"अवधीज्जनङ्गम इवैष
यदि हतदृषो दृषं ननु ।
स्पर्शमशुचिवपुरर्हति न
प्रतिमाननान्तु नितरां नृपोचिताम् ॥")

जनता, स्त्री, (जनानां समूहः । जन+"ग्रामजनबन्धुभ्यस्तल् ।" ४ । २ । ४३ । इति तल् ।) जनसमूहः । इत्यमरः । ३ । ३ । ४३ ॥ (यथा, रघौ । ११ । ८२ ।
"तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ ।
पश्यति स्म जनता दिनात्यये
पार्व्वणौ शशिदिवाकराविव ॥"* ॥
जनस्य भावः ।) जनत्वञ्च ॥

जननं, क्ली, (जन्यतेऽस्मिन्निति । जन+अधिकरणे ल्युट् ।) वंशः । (जन+भावे ल्युट् ।) जन्म । इति मेदिनी । ने, ६६ ॥ (यथा, महानिर्व्वाणतन्त्रे । ३ । ५० ।
"जननमरणभीतिभ्रंशि सच्चित्स्वरूपं
सकलभुवनबीजं ब्रह्मचैतन्यमीडे ॥"
उत्पत्तिः । यथा, कुमारे । १ । ४२ ।
"अन्योन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः ॥"
पुं, जनयति उत्पादयति जीवानिति । जन+णिच्+कर्त्तरि ल्युः । विष्णुः । यथा, महाभारते । १३ । १४९ । ११४ ।
"जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥"
"जन्तून् जनयन् जननः ।" इति तद्भाष्यम् ॥
जनयतीति । जनि+ल्युः । उत्पादके, त्रि । यथा, महाभारते । ३ । ३६ । ३५ ।
"एकत्र चिरवासो हि न प्रीतिजननो भवेत् ॥")

जननिः, स्त्री, (जनयति घ्राणसुखमिति । जन+णिच्+बाहुलकात् अनिः ।) जनीनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥

जननी, स्त्री, (जनयतीति । जनि+बाहुलकादनिः । कृदिकारादिति वा ङीष् । यद्वा, कृत्यल्युटो बहुलमिति ल्युट् टित्वात् ङीप् ।) माता । (यथा, पञ्चतन्त्रे । १ । ३६ ।
"निरतिशयं गरिमाणं
तेन जनन्याः स्मरन्ति विद्वांसः ।
यत् कमपि वहति गर्भं
महतामपि यो गुरुर्भवति ॥")
दया । इति मेदिनी । ने, ६६ ॥ जनीनामगन्धद्रव्यम् । (पर्य्याया यथा,—
"पर्प्पटी रञ्जना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसंस्पर्शा जतुकृच्चक्रवर्त्तिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) चर्म्मचटी । इति शब्दरत्नावली ॥ यूथिका । इति शब्दचन्द्रिका ॥ कटुका । मञ्जिष्ठा । अलक्तकः । जटामांसी । इति राजनिर्घण्टः ॥

जनपदः, पुं, (जनस्य लोकस्य पदं आश्रयस्थानं यत्र । जनः पदं वस्तु यस्येति वा ।) देशः । (यथा, चाणक्यशतके । ३१ ।
"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥"
जनपदनामानि महाभारते भीष्मपर्व्वणि ९ अध्याये कथितानि अतस्तत्रैव विशेषतो द्रष्टव्यानि ॥) जनः । इति मेदिनी । दे, ४८ ॥

जनप्रवादः, पुं, (जनेषु लोकेषु प्रवादोऽपवादः ।) लोकापवादः । तत्पर्य्यायः । कौलीनम् २ विगानम् ३ वचनीयता ४ । इति हेमचन्द्रः । ।२।१८४ ॥ (यथा, महाभारते । २।७२।१६ ।
"जनप्रवादान् सुबहून् शृण्वन्नपि नराधिपः ।
ह्रिया च धर्म्मसंयोगात् पार्थो द्यूतमियात्
पुनः ॥")

जनप्रियः, पुं, (जनानां प्रियः ।) धान्यकम् । शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥ (लोकप्रिये, त्रि ॥)

जनमेजयः, पुं, (जनान् शत्रुजनान् एजयति प्रतापैः कम्पयतीति । एजृ कम्पने+णिच्+"एजेः खश् ।"३।२।२८। इति खश् ततो मुमागमः ।) परीक्षितराजपुत्त्रः । तत्पर्य्यायः । राजर्षिः २ पारीक्षितः ३ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । ११ । ६ ।
"पौरजानपदा लोकाश्चक्रुस्तं नृपतिं शिशुम् ।
जनमेजयनामानं राजलक्षणसंयुतम् ॥"
जन्मेजय इति पाठोऽपि क्वचित् दृश्यते । तन्निरुक्तिस्तच्छब्दे द्रष्टव्या ॥

अयं हि चतुरशीतिवर्षाणि राज्यं कृतवान् । तत्र अश्वमेधादिकं बहुयज्ञं कृत्वा पितृवधामर्षात् सर्पसत्रं चकार । अत्रैवासौ जरत्कारुपुत्त्रेण आस्तीकेन प्रार्थितः सर्पसत्रात् विरराम ततश्चित्तप्रशमनार्थं भारतादिकं श्रुतवान् । वृत्तान्तश्चैषः क्रमशः प्रदर्श्यते । यथा, राजावल्यां १ परिच्छेदे ।
"पारीक्षितस्तदा राजा नीतिमानीतिभीतितः ।
पृथिवीं पालयामास निवसन् गजसाह्वये ।
कृत्वा पितृवधामर्षी सर्पेष्टिं मुनिभिः समम् ।
नाशयामास सर्पाणां कुलानि कुलनायकः ॥
हयमेधस्ततश्चक्रे सम्भारैर्बहुविस्तरैः ।
ब्रह्महत्याभवत्तत्र यागेऽकालकृते तदा ॥
तत् पापमभवत् तस्य दारुणं पृथिवीपतेः ।
वैशम्पायनतो वेदव्यासशिष्यात्तपोनिधेः ।
श्रुत्वा भारतमाख्यानं तत्पापात् मुक्तिमाप सः ।
चतुरशीतिवर्षाणि कृत्वा राज्यं सुनिर्म्मलम् ।
शतानीकं सुतं राज्ये संस्थाप्यैवं दिवं गतः ॥"
सोमश्रवसमृषिमसौ पौरहित्याय वृतवान् । तत्कथा यथा, महाभारते । १।३।१—२० ।
"जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्त्रमुपास्ते । तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति । तेषु तत्सत्त्रमुपासीनेष्वागच्छत् सारमेयः । स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छत् । तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति । स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति । तं माता प्रत्युवाच व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति । स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति । तच्छ्रुत्वा तस्य माता सरमा पुत्त्रदुःखार्त्ता तत् सत्त्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घं सत्त्रमुपास्ते । स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्त्रो न किञ्चिदपराध्यति नावेक्षते हवींषि नावलेढि किमर्थमभिहत इति । न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादयमभिहतोऽनपकारी तस्माददृष्टन्त्वां भयमागमिष्यतीति । जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषण्णश्चासीत् । स तस्मिन् सत्त्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोत् यो मे पापकृत्यां शमयेदिति । स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत् । तत्र कश्चिदृषिरासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्त्र आस्ते सोमश्रवा नाम । तस्य तं पुत्त्रमभिगम्य जनमेजयः पारीक्षितः पौरहित्याय वव्रे । स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्त्रो मम पुरोहितोऽस्त्विति । स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय ! पुत्त्रोऽयं मम सर्प्यां जातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपोवीर्य्यसम्भृतो मच्छुक्रपीतवत्यास्तस्याः कुक्षौ जातः । समर्थोऽयं भवतः सर्व्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम् । अस्य त्वेकमुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः कञ्चिदर्थमभियाचेत्तं तस्मै दद्यादयं यद्येतदुत्सहसे ततो नयस्वैनमिति । तेनैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तत्तथा भविष्यतीति ॥ * ॥
अस्य सर्पसत्रविवरणकथा यथा देवीभागवते । २ । ११ । ४६—६० ।
"इति तस्य वचः श्रुत्वा राजा जन्मेजयस्तदा ।
नेत्राभ्यामश्रुपातञ्च चकारातीवदुःखितः ॥
धिङ्मामस्तु सुदुर्बुद्धिर्वृथामानकरस्य वै ।
पिता यस्य गतिं घोरां प्राप्तः पन्नगपीड़ितः ॥
अद्याहं मखमारभ्य करोम्यपचितिं पितुः ।
हत्वा सर्पानसन्दिग्धो दीप्यमाने विभावसौ ॥
आहूय मन्त्रिणः सर्व्वान् राजा वचनमब्रवीत् ।
कुर्व्वन्तु यज्ञसम्भारं यथार्हं मन्त्रिसत्तमाः ! ॥
गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः ।
कुर्व्वन्तु मण्डपं स्वस्थाः शतस्तम्भं मनोहरम् ॥
वेदी यज्ञस्य कर्त्तव्या ममाद्य सचिवाः खलु ।
तदङ्गत्वे विधेयो वै सर्पसत्रः सुविस्तरः ॥
तत्राकस्तु पशुस्तत्र होतोत्तङ्को महामुनिः ।
शीघ्रमाहूयतां विप्राः सर्व्वज्ञा वेदपारगाः ॥
मन्त्रिणस्तु तदा चक्रुर्भूपवाक्यैर्विचक्षणाः ।